**प्रश्नः २२— ईश्वरेच्छा रूपा शक्तिरेव संकेतः संबन्धश्चेति नैयायिकानां मतं कथं न युक्तम्?**

उत्तरम्— इच्छायां सम्बन्धिनोः आधाराधेयभावस्य परिचायकत्वाभावात् संबन्धत्वाभावः।

**प्रश्नः २३—संबन्धस्य किं स्वरूपम्?**

उत्तरम्— संबन्धो हि संबन्धिद्वयभिन्नत्वे सति द्विष्ठत्वे सति आश्रयतया विशिष्टबुद्धि नियामको भवति।

**प्रश्नः २४— वैयाकरणमतेन शक्ते स्वरूपं किम्?**

उत्तरम्— पदपदार्थयोः संबन्धान्तरमेव शक्तिः वाच्यवाचकभावापरपर्याया।

**प्रश्नः २५— वैयाकरणाभिमतायाः शक्तेर्ग्राहकं किम्?**

उत्तरम्— शक्तेर्ग्राहकम् इतरेतराध्यासमूलकं तादात्म्यम्।

**प्रश्नः २६— वैयाकरणानुसारेण पदपदार्थयोः कः संबन्धः?**

उत्तरम्— तादात्म्यम्।

**प्रश्नः २७— तादात्म्यस्य स्वरूपं किम्?**

उत्तरम्— तद्भिन्नत्वेसति तदभेदेन प्रतीयमानत्वमितिभेदाभेदसमनियतम्।

**प्रश्नः २८— येन प्रकारेण शक्तिः साधुपदेषु भवति तेनैव प्रकारेण अपभ्रंशेषु भवति न वा?**

उत्तरम्— भवति।

**प्रश्नः २९— अपभ्रंशेष्वपि शक्तिसत्तायाः किं कारणम्?**

उत्तरम्— शक्तिग्राहक शिरोमणेः व्यवहारस्य साधुपदेष्विव अपभ्रंशेष्वपि विद्यमानत्वात्।

**प्रश्नः ३०— किं नाम साधुत्वम्?**

उत्तरम्— व्याकरणान्वयाख्येयत्वम् पुण्यजनकतावच्छेदक धर्मवत्त्वं वा साधुत्वम्।

**प्रश्नः ३१— नागेशानुसारेण शक्तेः कति भेदाः भवन्ति?**

उत्तरम्— त्रयो भेदाः। रूढिः, योगः; योगरूढिश्च।

**प्रश्नः ३२— रूढिं सोदाहरणं निरूपयत?**

उत्तरम्— शास्त्रकल्पिताक्यवार्थ मानाभावे समुदायार्थनिरूपितशक्ती रूढिः। यथा— मणिनूपुरादौ।

**प्रश्नः ३३— योगशक्तिं निरूपयन्तु सोदाहरणम्?**

उत्तरम्— शास्त्रकल्पितावयवार्थ निरूपिता शक्तिर्योगः। यथा पाचकादौ।

Scanned with CamScanner